## ॥प्रार्थना श्लोकाः॥

ओं गणानान्त्वा गणपतिग् हवामहे कवि ङ्कवीना मुपमश्रवस्तमम्। ज्येष्ठराज म्ब्रह्मणा म्ब्रह्मण स्पत आन श्श्रुण्व न्नूतिभि स्सीद सादनम्॥
श्री महागणाधिपतये नमः॥

प्रणोदेवी सरस्वती वाजेभिर्वाजिनीवती। धीनाम वित्र्यवतु॥
श्री महा सरस्वत्यैनमः॥

गुरुर्ब्रह्मा गुरुर्विष्णु र्गुरुर्देवो महेश्वरः।
गुरु स्साक्षात् पर म्ब्रह्मा तस्मैश्री गुरवेनमः॥

श्री गुरुभ्यो नमः॥ हरिः ओं(4)॥

# न्यासः

अस्यश्रीरुद्रस्यप्रश्नस्य। अघोर ऋषिः। अनुष्टुप्छ न्दः। सङ्कर्षणमूर्ति स्वरूपोयो ऽसावादित्यः। परमपुरुष स्स एष रुद्रो देवता।

अग्निक्रतुचरमेष्टकायग्ं शतरुद्रीये जपाभिषेके विनियोगः।

एकागायत्रीच्छन्दः। तिस्रो ऽनुष्टुभः। तिस्रः पङ्तयः। सप्तानुष्टुभः। द्वेजगत्यौ॥

| | | |
|---|---|---|
| नमश्शम्भवे च | अग्निहोत्रात्मने | अङ्गुष्ठाभ्यां नमः |
| मयोभवे च | दर्शपूर्ण मासात्मने | तर्जनीभ्याम् नमः |
| नमश्शङ्कराय च | चातु र्मासात्मने | मध्यमाभ्यां नमः |
| मयस्कराय च | निरूढ पशुबन्धात्मने | अनामिकाभ्यां नमः |
| नमश्शिवाय च | ज्योतिष्टोमात्मने | कनिष्ठीकाभ्यां नमः |
| नमश्शिवतराय च | सर्वक्रत्वात्मने | करतल करपृष्ठाभ्यां नमः |
| नमश्शम्भवे च | अग्निहोत्रात्मने | हृदयाय नमः |
| मयोभवे च | दर्शपूर्ण मासात्मने | शिरसे स्वाहा |
| नमश्शङ्कराय च | चातु र्मासात्मने | शिकायै वषट् |
| मयस्कराय च | निरूढ पशुबन्धात्मने | कवचाय हुम् |
| नमश्शिवाय च | ज्योतिष्टोमात्मने | नेत्रत्रयाय वौषट् |
| नमश्शिवतराय च | सर्वक्रत्वात्मने | अस्त्रायफट् |

भूर्भुवस्सुवरोमिति दिग्भन्धः॥

## ध्यानं

आपाताळ–नभःस्थलान्त–भुवन–ब्रहाण्ड–माविस्फुरत्–
ज्योतिः स्फाटिक–लिङ्ग–मौळि–विलसत्–पूर्णेन्दु–वान्तामृतैः।
आस्तोकाप्लुत–मेक–मीश–मनिशं–रुद्रानु–वाकाञ्जपन्
ध्याये–दीप्सित–सिद्धये ध्रुवपदं विप्रो ऽभिषिञ्चे–च्चिवम्॥

ब्रह्माण्डव्याप्तदेहा भसितहिमरुचा भासमाना भुजङ्गैः
कण्ठे कालाः कपर्दाः कलित–शशिकला–श्चण्ड कोदण्ड हस्ताः।
त्र्यक्षा रुद्राक्षमालाः सुललित वपुष श्शाम्भवा मूर्तिभेदाः
रुद्राः श्रीरुद्रसूक्त–प्रकटितविभवा नः प्रयच्चन्तु सौख्यम्॥

# रुद्र नमक प्रश्नः

॥ ओं नमो भगवते रुद्राय ओं नम्॥

नम स्ते रुद्र मन्यव उतो त इषवे नमः।

नम स्ते अस्तु धन्वने बाहुभ्या मुत ते नमः।

या त इषु श्शिवतमा शिव म्बभूव ते धनुः।

शिवा शरव्या या तव तया नो रुद्र मृडय।

या ते रुद्र शिवा तनू रघोरा ऽपापकाशिनी।

तया न स्तनुवा शन्तमया गिरिशन्ता ऽभि चाकशीहि।

या मिषु ङ्गिरिशन्त हस्ते(1) बिभर्ष्यस्तवे।

शिवा ङ्गिरित्र ता ङ्कुरु मा हिग्ं्सीः पुरुष ञ्जगत्।

शिवेन वचसा त्वा गिरिशा ऽच्छा वदामसि।

यथा न स्सर्व मि ज्जग दयख्ष्मग्ं सुमना असत्।

अध्यवोच दधिवक्ता प्रथमो दैव्यो भिषक्।

अहीग्ंश्च सर्वा ञ्जम्भय न्थ्सर्वाश्च यातुधान्यः।

असौ यस्ताम्रो अरुण उत बभ्रु स्सुमङ्गलः।

ये चेमाग्ं रुद्रा अभितो दिख्षु(2) श्रिता स्सहस्रशो ऽवैषाग्ं हेड ईमहे।

असौ यो ऽवसर्पति नीलग्रीवो विलोहितः।

उतैन ङ्गोपा अदृश न्नदृश न्नुदहार्यः।

उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः।

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।

अथो ये अस्य सत्वानो ऽह न्तेभ्यो ऽकर न्नमः।

प्र मुञ्च धन्वन स्त्व मुभयो रार्त्नियो र्ज्याम्।

याश्च ते हस्त इषवः(3) परा ता भगवो वप।

अवतत्य धनु स्त्वग्ं सहस्राक्ष शतेषुधे।

निशीर्य शल्याना म्मुखा शिवो न स्सुमना भव।

विज्य न्धनुः कपर्दिनो विशल्यो बाणवाग्ं उत।

अनेश न्नस्येषव आभु रस्य निषङ्गथिः।

या ते हेति र्मीढुष्टम हस्ते बभूव ते धनुः।

तया ऽस्मान् विश्वत स्त्व मयक्ष्मया परि ब्भुज।

नमस्ते अस्त्वायुधाया ऽनातताय धृष्णवे।

उभाभ्या मुत ते नमो बाहुभ्या न्तव धन्वने।

परि ते धन्वनो हेति रस्मा न्वृणक्तु विश्वतः।

अथो य इषुधि स्तवा ऽऽरे अस्मन्नि धेहि तम्(4)||1||

नमस्ते अस्तु भगव न्विश्वेश्वराय महा देवाय त्र्यम्बकाय त्रिपुराऽन्तकाय त्रिकाऽग्नि कालाय कालाऽग्नि रुद्राय नील कण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदा शिवाय श्रीमन्महा देवाय नमः।

नमो हिरण्यबाहवे सेनान्ये दिशा ञ्च पतये नमो
नमो वृख्षेभ्यो हरिकेशेभ्यः पशूना म्पतये नमो
नम स्सस्पिञ्जराय त्विषीमते पथीना म्पतये नमो
नमो बभ्लुशाय विव्याधिने ऽन्नाना म्पतये नमो
नमो हरिकेशायोपवीतिने पुष्टाना म्पतये नमो
नमो भवस्य हेत्यै जगता म्पतये नमो
नमो रुद्राया ऽऽततताविने ख्षेत्राणा म्पतये नमो
नम स्सूताया ऽहन्त्याय वनाना म्पतये नमो
नमो(5) रोहिताय स्थपतये वृख्षाणा म्पतये नमो
नमो मन्त्रिणे वाणिजाय कख्षाणा म्पतये नमो
नमो भुवन्तये वारिवस्कृतायौषधीना म्पतये नमो
नम उच्चैर्घोषाया ऽऽक्रन्दयते पत्तीना म्पतये नमो
नमः कृथ्स्नवीताय धावते सत्त्वना म्पतये नमः(6)||2||

नम स्सहमानाय निव्याधिन आव्याधिनीना म्पतये नमो

नमः ककुभाय निषङ्गिणे स्तेनाना म्पतये नमो

नमो निषङ्गिण इषुधिमते तस्कराणा म्पतये नमो

नमो वञ्चते परिवञ्चते स्तायूना म्पतये नमो

नमो निचेरवे परिचराया ऽरण्याना म्पतये नमो

नम स्सृकाविभ्यो जिघाग्ंसद्भ्यो मुष्णता म्पतये नमो

नमो ऽसिमद्भ्यो नक्त ञ्चरद्भ्यः प्रकृन्ताना म्पतये नमो

नम उष्णीषिणे गिरिचराय कुलुञ्चाना म्पतये नमो

नम(7) इषुमद्भ्यो धन्वाविभ्यश्च वो नमो

नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो

नम आयच्छध्भ्यो विसृजद्भ्यश्च वो नमो

नमो ऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो

नम आसीनेभ्य श्शयानेभ्यश्च वो नमो

नम स्स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो

नम स्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो

नम स्सभाभ्य स्सभापतिभ्यश्च वो नमो

नमो अश्वेभ्यो ऽश्वपतिभ्यश्च वो नमः(8)||3||

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो

नम उगणाभ्य स्तृगंहतीभ्यश्च वो नमो

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो

नमो गणेभ्यो गणपतिभ्यश्च वो नमो

नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो

नमो महद्भ्यः ख्षुल्लकेभ्यश्च वो नमो

नमो रथिभ्यो ऽरथेभ्यश्च वो नमो

नमो रथेभ्यो(9)रथपतिभ्यश्च वो नमो

नम स्सेनाभ्य स्सेनानिभ्यश्च वो नमो

नमः ख्षत्तृभ्य स्सङ्ग्रहीतृभ्यश्च वो नमो

नम स्तख्षभ्यो रथकारेभ्यश्च वो नमो

नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो

नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो

नम इषुकृद्भ्यो धन्वकृध्भ्यश्च वो नमो

नमो मृगयुभ्य श्श्वनिभ्यश्च वो नमो

नम श्श्वभ्य श्श्वपतिभ्यश्च वो नमः(10)||4||

नमो भवाय च रुद्राय च

नम श्शर्वाय च पशुपतये च

नमो नीलग्रीवाय च शितिकण्ठाय च

नमः कपर्दिने च व्युप्तकेशाय च

नम स्सहस्राख्षाय च शतधन्वने च

नमो गिरिशाय च शिपिविष्टाय च

नमो मीढुष्टमाय चेषुमते च

नमो ह्रस्वाय च वामनाय च

नमो बृहते च वर्षीयसे च

नमो वृद्धाय च संवृध्वने च(11)

नमो अग्रियाय च प्रथमाय च

नम आशवे चा ऽजिराय च

नम श्शीघ्रियाय च शीभ्याय च

नम ऊर्म्याय चा ऽवस्वन्याय च

नम स्स्रोतस्याय च द्वीप्याय च(12)||5||

नमो ज्येष्ठाय च कनिष्ठाय च

नमः पूर्वजाय चा ऽपरजाय च

नमो मध्यमाय चा ऽपगल्भाय च

नमो जघन्याय च बुध्नियाय च

नम स्सोभ्याय च प्रतिसर्याय च

नमो याम्याय च ख्षेम्याय च

नम उर्वर्याय च खल्याय च

नम श्श्लोक्याय चा ऽ वसान्याय च

नमो वन्याय च कख्ष्याय च

नम श्श्रवाय च प्रतिश्रवाय च(13)

नम आशुषेणाय चा ऽऽशुरथाय च

नम श्शूराय चा ऽवभिन्दते च

नमो वर्मिणे च वरूथिने च

नमो बिल्मिने च कवचिने च

नम श्श्रुताय च श्रुतसेनाय च(14)||6||

नमो दुन्दुभ्याय चा ऽऽहनन्याय च

नमो धृष्णवे च प्रमृशाय च

नमो दूताय च प्रहिताय च

नमो निषङ्गिणे चेषुधिमते च

नम स्तीख्ष्णेषवे चा ऽऽयुधिने च

नम स्स्वायुधाय च सुधन्वने च

नम स्स्रुत्याय च पथ्याय च

नमः काट्याय च नीप्याय च

नम स्सूद्याय च सरस्याय च

नमो नाद्याय च वैशन्ताय च(15)

नमः कूप्याय चा ऽवट्याय च

नमो वर्ष्याय चा ऽवर्ष्याय च

नमो मेघ्याय च विद्युत्याय च

नम ईध्रियाय चा ऽऽतप्याय च

नमो वात्याय च रेष्मियाय च

नमो वास्तव्याय च वास्तुपाय च(16)||7||

नम स्सोमाय च रुद्राय च

नम स्ताम्राय चा ऽरुणाय च

नम श्शङ्गाय च पशुपतये च

नम उग्राय च भीमाय च

नमो अग्रेवधाय च दूरेवधाय च

नमो हन्त्रे च हनीयसे च

नमो वृक्षेभ्यो हरिकेशेभ्यो

नम स्ताराय नम श्शम्भवे च मयोभवे च

नम श्शङ्कराय च मयस्कराय च

नम श्शिवाय च शिवतराय च(17)

नम स्तीर्थ्याय च कूल्याय च

नमः पार्याय चा ऽवार्याय च

नमः प्रतरणाय चोत्तरणाय च

नम आतार्याय चा ऽऽलाद्याय च

नम श्शष्प्याय च फेन्याय च

नम स्सिकत्याय च प्रवाह्याय च(18)||8||

नम इरिण्याय च प्रपथ्याय च

नमः किग्ंशिलाय च क्षयणाय च

नमः कपर्दिने च पुलस्तये च

नमो गोष्ठ्याय च गृह्याय च

नम स्तल्प्याय च गेह्याय च

नमः काट्याय च गह्वरेष्ठाय च

नमो ह्रदय्याय च निवेष्प्याय च

नमः पाग्ंसव्याय च रजस्याय च

नम श्शुष्क्याय च हरित्याय च

नमो लोप्याय चोलप्याय च(19)

नम ऊर्व्याय च सूर्म्याय च

नमः पर्ण्याय च पर्णशद्याय च

नमो ऽपगुरमाणाय चा ऽभिघ्नते च

नम आक्खिदते च प्रक्खिदते च

नमो वः किरिकेभ्यो देवानाग्ं हृदयेभ्यो

नमो विख्षीणकेभ्यो नमो विचिन्वत्केभ्यो

नम आनिर्हतेभ्यो नम आमीवत्केभ्यः(20)||9||

द्रापे अन्धस स्पते दरिद्र न्नीललोहित।

एषा म्पुरुषाणा मेशा म्पशूना म्मा भे र्मा ऽरो मो एषा ङ्किं ञ्चना ऽऽममत्।

या ते रुद्र शिवा तनू श्शिवा विश्वाहभेषजी।

शिवा रुद्रस्य भेषजी तया नो मृड जीवसे॥

इमाग्ं रुद्राय तवसे कपर्दिने ख्षयद्वीराय प्र भरामहे मतिम्।

यथा न श्श मस द्द्विपदे चतुष्पदे विश्व म्पुष्ट ङ्ग्रामे अस्मि(21) न्ननातुरम्।

मृडा नो रुद्रोत नो मय स्कृधि ख्षयद्वीराय नमसा विधेम ते।

यच्छ ञ्च योश्च मनु रायजे पिता त दश्याम तव रुद्र प्रणीतौ।

मा नो महान्त मुत मा नो अर्भक म्मा न उखन्त मुत मा न उखितम्।

मा नो वधीः पितर म्मोत मातर म्प्रिया मा न स्तनुवो(22) रुद्र रीरिषः

मा न स्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।

वीरा न्मा नो रुद्र भामितो वधीर् हविष्मन्तो नमसा विधेम ते।

आरात्ते गोघ्न उत पूरुषघ्ने खयद्वीराय सुम्न मस्मे ते अस्तु।

रखा च नो अधि च देव ब्रूह्यधा च नश्शर्म यच्छ द्विबर्हाः।

स्तुहि(23) श्रुत ङ्गर्तसदं युवान म्मृग न्न भीम मुपहत्नु मुग्रम्।

मृडा जरित्रे रुद्र स्तवानो अन्य न्ते अस्मन्नि वपन्तु सेनाः।

परि णो रुद्रस्य हेति र्वृणक्तु परि त्वेषस्य दुर्मति रघायोः।

अव स्थिरा मघवद्भ्य स्तनुष्व मीढ्व स्तोकाय तनयाय मृडय।

मीढुष्टम शिवतम शिवो नस्सुमना भव।

परमे वृख आयुध न्निधाय कृत्तिं वसान आ चर पिनाक(24) म्बिभ्र दा गहि।

विकिरिद विलोहित नम स्ते अस्तु भगवः।

यास्ते सहस्रग्ं हेतयो ऽन्य मस्म न्नि वपन्तु ताः।

सहस्राणि सहस्रधा बाहुवो स्तव हेतयः।

तासा मीशानो भगवः पराचीना मुखा कृधि(25)||10||

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्।

तेषाग्ं सहस्रयोजने ऽव धन्वानि तन्मसि।

अस्मि न्महत्यर्णवे ऽन्तरिख्षे भवा अधि।

नीलग्रीवा श्शितिकण्ठा श्शर्वा अधः ख्षमाचराः।

नीलग्रीवा श्शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः।

ये वृख्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः।

ये भूताना मधिपतयो विशिखासः कपर्दिनः।

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्।

ये पथा म्पथिरख्षय ऐलबृदा यव्युधः।

ये तीर्थानि(26) प्रचरन्ति सृकावन्तो निषङ्गिणः।

य एतावन्त श्च भूयाग्ंस श्च दिशो रुद्रा वितस्थिरे।

तेषाग्ं सहस्रयोजने ऽव धन्वानि तन्मसि।

नमो रुद्रेभ्यो ये पृथिव्यां ये ऽन्तरिख्षे

ये दिवि येषा मन्नं वातो वर्ष मिषव स्तेभ्यो दश प्राची र्दश दख्षिणा दश प्रतीची

र्दशोदीची र्दशोर्ध्वा स्तेभ्यो नमस्ते नो

मृडयन्तु ते य न्द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि(27)||11||

त्र्यम्बकं यजामहे सुगन्धि म्पुष्टि वर्धनम्। उर्वारुक मिव बन्धना न्मृत्यो र्मुख्षीय मा

ऽमृतात्।

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना ऽऽविवेश तस्मै रुद्राय नमो अस्तु।

त मु ष्टुहि य स्स्विषु स्सुधन्वा यो विश्वस्य ख्वयति भेषजस्य।

यख्वा महे सौमनसाय रुद्र न्नमोभि र्देव मसुर न्दुवस्य।

अय म्मे हस्तो भगवा नय म्मे भगवत्तरः।

अय म्मे विश्वभेषजो ऽयं शिवाभिमर्शनः।

ये ते सहस्र मयुत म्पाशा मृत्यो मर्त्याय हन्तवे। तान् यज्ञस्य मायया सर्वा नव यजामहे। मृत्यवे स्वाहा मृत्यवे स्वाहा।

ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि।

प्राणाना ङ्ग्रन्थि रसि रुद्रो मा विशा ऽन्तकः।

तेना ऽन्नेना प्यायस्व।

नमो रुद्राय विष्णवे मृत्यु र्मे पाहि॥

॥ओं शांति रशांति रशांतिः॥

# चमक प्रश्नः

अग्नाविष्णू सजोषसेमा वर्धन्तु वा ङ्गिरः। द्युम्नै र्वाजेभि रा गतम्॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मे ऽपान(1) श्च मे व्यानश्च मे ऽसुश्च मे चित्त ञ्च म आधीत ञ्च मे वाक्च मे मनश्च मे चख्षुश्च मे श्रोत्र ञ्च मे दख्षश्च मे बल ञ्च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मे ऽङ्गानि च मे ऽस्थानि च मे परूग्ंषि च मे शरीराणि च मे(2)||1||

ज्यैष्ठ्य ञ्च म आधिपत्य ञ्च मे मन्युश्च मे भामश्च मे ऽमश्च मे ऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्ध ञ्च मे वृद्धिश्च मे सत्य ञ्च मे श्रद्धा च मे जगच्च मे(3) धन ञ्च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जात ञ्च मे जनिष्यमाण ञ्च मे सूक्त ञ्च मे सुकृत ञ्च मे वित्त ञ्च मे वेद्य ञ्च मे भूत ञ्च मे भविष्यच्च मे सुग ञ्च मे सुपथ ञ्च म ऋद्ध ञ्च म ऋद्धिश्च मे क्लुप्त ञ्च मे क्लु प्तिश्च मे मतिश्च मे सुमतिश्च मे(4)||2||

श ञ्च मे मयश्च मे प्रिय ञ्च मे ऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्र ञ्च

मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविण ञ्च मे यन्ता च मे धर्ता च मे खेमश्च मे धृतिश्च मे विश्व ञ्च(5) मे महश्च मे संविच्च मे ज्ञात्र ञ्च मे सूश्च मे प्रसूश्च मे सीर ञ्च मे लयश्च म ऋत ञ्च मे ऽमृत ञ्च मे ऽयख्म ञ्च मे ऽनामयच्च मे जीवातुश्च मे दीर्घायुत्व ञ्च मे ऽनमित्रञ्च मे ऽभय ञ्च मे सुग ञ्च मे शयन ञ्च मे सूषा च मे सुदिन ञ्च मे(6)||3||

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृत ञ्च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्य ञ्च मे रयिश्च मे रायश्च मे पुष्ट ञ्च मे पुष्टिश्च मे विभु च(7) मे प्रभु च मे बहु च मे भूयश्च मे पूर्ण ञ्च मे पूर्णतर ञ्च मे ऽक्षितिश्च मे कूयवाश्च मे ऽन्न ञ्च मे ऽख्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मे ऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे(8)||4||

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मे ऽयश्च मे सीस ञ्च मे त्रपुश्च मे श्याम ञ्च मे लोह ञ्च मे ऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्य ञ्च(9) मे ऽकृष्टपच्य ञ्च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तञ्च मे वित्तिश्च मे भूत ञ्च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे ऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे(10)||5||

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च(11) म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मे ऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मे ऽन्तरिख्ष ञ्च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे(12)||6||

अग्ंशुश्च मे रश्मिश्च मे ऽदाभ्यश्च मे ऽधिपतिश्च म उपाग्ंशुश्च मे ऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च(13) मे ऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे(14)||7||

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मे ऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्र ञ्च मे हविर्धान ञ्च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मे ऽवभृथश्च मे स्वगाकारश्च मे(15)||8||

अग्निश्च मे घर्मश्च मे ऽर्कश्च मे सूर्यश्च मे प्राणश्च मे ऽश्वमेधश्च मे पृथिवी च मे ऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरी रङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च

मे साम च मे स्तोमश्च मे यजुश्च मे दीख्सा च मे तपश्च म ऋतुश्च मे व्रतञ्च मे ऽहोरात्रयो र्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम्(16)||9||

गर्भाश्च मे वथ्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट्च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवथ्सश्च मे त्रिवथ्सा च मे तुर्यवाट्च मे तुर्यौही च मे पष्ठवाच्च मे पष्ठौही च म उख्सा च मे वशा च म ऋषभश्च(17) मे वेहच्च मे ऽनड्वा ञ्च मे धेनुश्च म आयु र्यज्ञेन कल्पता म्प्राणो यज्ञेन कल्पता मपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पता ञ्चख्सु र्यज्ञेन कल्पताग् श्रोत्रं यज्ञेन कल्पता म्मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पता मात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्(18)||10||

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविग्ंशतिश्च मे त्रयोविग्ंशतिश्च मे पञ्चविग्ंशतिश्च मे सप्तविग्ंशतिश्च मे नवविग्ंशतिश्च म एकत्रिग्ंशच्च मे त्रयस्त्रिग्ंशच्च(19) मे चतस्रश्च मे ऽष्टौ च मे द्वादश च मे षोडश च मे विग्ंशतिश्च मे चतुर्विग्ंशतिश्च मे ऽष्टाविग्ंशतिश्च मे द्वात्रिग्ंशच्च मे षट्त्रिग्ंशच्च मे चत्वारिग्ंशच्च मे चतुश्चत्वारिग्ंशच्च मे ऽष्टाचत्वारिग्ंशच्च मे वाजश्च प्रसवश्चा ऽपिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चा ऽऽन्त्यायनश्चा ऽन्त्यश्च भौवनश्च भुवनश्चा ऽधिपतिश्च(20)||11||

ओं इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि
शग्ंसिषद्विश्वेदेवा स्सूक्तवाचः पृथिवि मातर्मा मा हिग्ंसीर्मधु मनिष्ये मधु जनिष्ये
मधु वख्ष्यामि मधु वदिष्यामि मधुमती न्देवेभ्यो वाचमुद्यासग्ं शुश्रूषेण्या
म्मनुष्येभ्यस्त म्मा देवा अवन्तु शोभायै पितरो ऽनुमदन्तु॥

॥ओं शान्ति रशान्ति रशान्तिः॥